# Prarthanapaddhatih

# પ્રાર્થનાપદ્ધતિઃ

## Document Information

Text title : prArthanApaddhatiH

File name : prArthanApaddhatiH.itx

Category : vishhnu, krishna, rUpagosvAmin, stavamAlA

Location : doc_vishhnu

Author : Rupagoswami

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Description/comments : From stavamAlA (rUpagosvAmivirachitA) Garland of Devotional Prayers stavamAlA

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : February 22, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

September 17, 2023

*sanskritdocuments.org*

# પ્રાર્થનાપદ્ધતિઃ

શ્રીરાધિકાયૈ નમઃ ।
શુદ્ધગાઙ્ગેયગૌરાઙ્ગીં કુરઙ્ગીલઙ્ગિમેક્ષણામ્ ।
જિતકોટીન્દુબિમ્બાસ્યામમ્બુદામ્બરસંવૃતામ્ ॥ ૧॥

નવીનવલ્લવીવૃન્દધમ્મિલ્લોત્ફુલ્લમલ્લિકામ્ ।
દિવ્યરત્નાઢ્યલઙ્કારસેવ્યમાનતનુશ્રિયમ્ ॥ ૨॥

વિદગ્ધમણ્ડલગુરું ગણગૌરવમણ્ડિતામ્ ।
અતિપ્રેષ્ઠવયસ્યાભિરષ્ટાભિરભિવેષ્ટિતામ્ ॥ ૩॥

ચઞ્ચલાપાઙ્ગભઙ્ગેન વ્યાકુલીકૃતકેશવામ્ ।
ગોષ્ઠેન્દ્રસુતજીવાતુરમ્યબિમ્બાધરામૃતામ્ ॥ ૪॥

ત્વામસૌ યાચતે નત્વા વિલુઠન્ યમુનાતટે ।
કાકુભિર્વ્યાકુલસ્વાન્તો જનો વૃન્દાવનેશ્વરિ ॥ ૫॥

કૃતાગસ્કેઽપ્યયોગ્યેઽપિ જનેઽસ્મિન્ કુમતાવપિ ।
દાસ્યદાનપ્રદાનસ્ય લવમપ્યુપપાદય ॥ ૬॥

યુક્તસ્ત્વયા જનો નૈવ દુઃખિતોઽયમુપેક્ષિતુમ્ ।
કૃપાદ્યોતદ્રવચ્ચિત્તનવનીતાસિ યત્ સદા ॥ ૭॥

ઇતિ શ્રીરૂપગોસ્વામિવિરચિતસ્તવમાલાયાં પ્રાર્થનાપદ્ધતિઃ સમાપ્તા ।

*Prarthanapaddhatih*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*